केन्द्रीयसंस्कृतविश्वविद्यालयः, दिल्ली
( संसदः अधिनियमेन स्थापितः )

स्वतन्त्रतायाः अमृतमहोत्सवः

नवशृङ्खला 02-03 संयुक्ताङ्कः ISSN : 0975-2676

# संस्कृतवार्ता

त्रैमासिकं वार्तापत्रम्

वर्षम्-12 वैक्रमाब्दः 2079 चैत्रकृष्ण 30 - भाद्रपदशुक्ल 5 अप्रैल - सितम्बर 2022
















https://www.facebook.com/centralsanskrit

https://www.youtube.com/c/CentralSanskritUniversityDelhi

https://twitter.com/centralsanskrit




मुख्यपरामर्शदाता

**प्रो. श्रीनिवासवरखेडी**

कुलपतिः

केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली

सम्पादकौ

**डॉ. मधुकेश्वरभट्टः**

**डॉ. अजयकुमारमिश्रः**



**केन्द्रीयसंस्कृतविश्वविद्यालयः, देहली**

स्वतन्त्रतायाः अमृतमहोत्सवः

अयि प्रिया: छात्रा: !

प्रस्तूयते छात्रहितसाधकं

**'प्रतिस्पन्दनम्' इति Mobile App**

- अनेन भवन्त:/भवत्य: सर्वविधं परामर्शं काठिन्यं च विविधस्तरेषु सम्बद्धम् अधिकारिणं ज्ञापयितुं शक्नुवन्ति।
- तत्पश्चात् पृथक्तया E-mail अथवा डाकद्वारा समस्याया: सूचना न प्रेषणीया। App द्वारा समाधानं सूचयिष्यते।
- Play Store त: एतत् App अवाहर्तुं (Download) शक्नुवन्ति।

Scan



एतत् QR Code उपयुज्य साक्षात्
'प्रतिस्पन्दनम्' Mobile App अवाहर्तुं शक्नुवन्ति ।

- पारदर्शितया गोपनीयतया च यथाशीघ्रं यथासम्भवं च समाधानं भविष्यति।

आयान्तु, विश्वविद्यालये गुणवत्तापूर्णां व्यवस्थां कर्तुं स्वीयं रचनात्मकं योगदानं ददतु।


## विश्वविद्यालयस्य विशेषपादविन्यासः

- प्रथमस्य उत्कर्षमहोत्सवस्य (2022) सफलम् आयोजनम्।
- संस्कृतसंवर्धनाय विविधसंस्थाभिः सह सहमतिपत्रस्य हस्ताङ्कनम्।
- छात्राः पूर्वच्छात्राः, अध्यापकाः, अभिभावकाः इत्यादिभिश्च साक्षात् सम्वादः।
- शास्त्रायणम् (Run for Samskritam) इत्यस्य समाह्वनम्।
- 'राष्ट्रियशिक्षानीतिः-2020' इत्यस्य क्रियान्वयनम्।
- परिसरत्रयस्य एफ.एस.सी. अनुमोदनार्थं प्रेषितम्।
- विश्वविद्यालयस्य 07 अध्यादेशाः अनुमोदिता।
- आदर्शमहाविद्यालयानां नवसंशोधितनियमावलिः निर्मिता।
- विविधपाठ्यक्रमेषु प्रवेशार्थं NTA माध्यमेन प्रवेशपरीक्षायाः आयोजनम्।
- शोध, प्रकाशन, IQAC इत्यादीनां विविधसमितीनां पुनर्घटनम्।
- आन्तरिकगुणवत्ताप्रत्यायनप्रकोष्ठः (NAAC) इत्यस्य कृते केन्द्रीयसंस्कृतविश्वविद्यालयपक्षतः AQAR 2020-21 समर्पणम्।
- भारतसर्वकारस्य ई-समर्थ-पोर्टल् मध्ये सफलतया पञ्जीकरणं कार्यारम्भश्च।
- केन्द्रसर्वकारस्य परियोजनानाम् आनलाईनमाध्यमेन पञ्जीकरणम्।
- भारतसर्वकारस्य ई-मुद्रा-पोर्टल्-मध्ये पञ्जीकरणम्।
- Digi Locker इत्यत्र विश्वविद्यालयस्य प्रमाणपत्राणाम् अङ्कपत्राणाञ्च उपारोपणम्।
- शोधगङ्गायां शोधप्रबन्धानाम् उपारोपणम्।
- शोधशुद्धिमाध्यमेन Plagiarism परीक्षणं तदनु शोधप्रक्रियायां गुणवत्तासम्पादनम्।
- AIU द्वारा प्रकाशितायां University News इति पत्रिकायां विद्यावारिधिः इति उपाधिप्राप्तवतां शोधप्रबन्धानाम् अधिसूचनाः।
- विद्यावारिधेः नूतननियमावलिनिर्माणं क्रियान्वयनं च।
- प्रकाशनस्य नवीननियमावलिनिर्माणम्।


प्रकाशकः

**कुलसचिवः**

**केन्द्रीयसंस्कृतविश्वविद्यालयः**

(संसदः अधिनियमेन स्थापितः)

56-57, इन्स्टीट्यूशनल् एरिया, जनकपुरी,

नवदेहली-110058

011-28524993, 28521994, 28520977

emial : registrar@csu.co.in
website : www.sanskrit.nic.in

# समाचरितः उत्कर्षमहोत्सवः

त्रयाणां मानितविश्वविद्यालयानां केन्द्रीयसंस्कृतविश्वविद्यालय-रूपेण प्रोन्नतिमुपलक्ष्य त्रयः संस्कृतविश्वविद्यालयाः संभूय उत्कर्ष-महोत्सवः 2022वर्षस्य मईमासस्य सप्तमदिनाङ्कतः नवमदिनाङ्कं यावत् नवदेहलीस्थस्य अम्बेडकर-अन्ताराष्ट्रीयकेन्द्रे वैभवेन समाचरितः।



















उत्कर्षमहोत्सवस्य समापनसत्रे समुपस्थिताः भारतसर्वकारस्य शिक्षामन्त्रालयस्य माननीयाः शिक्षामन्त्रिणाः श्रीधर्मेन्द्र-प्रधानमहाभागाः राष्ट्रीयअनुदानायोगस्य अध्यक्षः जगदीशशर्म-महाभागाः, भारतीयभाषासमितेः अध्यक्षाः श्रीचमूकृष्णशास्त्रिवर्याः अन्ये अतिथयश्च।

















## समायोजिता एकदिवसीया राष्ट्रिया संगोष्ठी

केन्द्रीयसंस्कृतविश्वविद्यालयः भारतीयदार्शनिकानुसन्धानपरिषद् इत्यनयोः संयुक्ततत्त्वावधाने आधुनिकपाश्चात्त्यमीमांसायां स्वातन्त्र्यविमर्शः इति विषये जुलैमासस्य द्वाविंशतिदिनाङ्के एकदिवसीया राष्ट्रियसंगोष्ठी इन्डियन इन्टरनाशनल-सेन्टरमध्ये समायोजिता। तत्र विशिष्टवक्तृरूपेण अमेरिकादेशस्य हवायीविश्व-विद्यालयस्य दर्शनविभागस्य आचार्यः प्रो. अरिन्दम चक्रवर्तिमहाभागः, सभाध्यक्ष-रूपेण राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिचरः प्रो. कुटुम्बशास्त्रिमहाभागः एवं माननीयकुलपतिः श्रीनिवासवरखेडीवर्यः च समुस्थितः आसीत्।



## समाचरितः संस्कृतसप्ताहः

अगस्तमासस्य अष्टमदिनाङ्कतः चतुर्दशदिनाङ्कं यावत् वैभवेन संस्कृतसप्ताहमहोत्सवः समनुष्ठितः। संस्कृतस्पताहमहोत्सवस्य विशेषकार्यक्रमे भारतसर्वकारस्य शिक्षामन्त्रालयस्य माननीयः शिक्षाराज्यमन्त्री डॉ. शुभाष सरकारमहोदयः, संस्कृतभारत्याः सङ्घटनमन्त्री श्रीदिनेश कामतवर्यः, श्रीलालबहादुरराष्ट्रीयसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. मुरलीमनोहर पाठकवर्यः, केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. श्रीनिवास वरखेडीवर्यः च। एवं समापनसत्रे संस्कृतभारत्याः श्रीदेवपूजारिमहाभागाः समुपस्थिता आसन्।






## शिक्षकपर्व

केन्द्रीयसंस्कृतविश्वविद्यालयेन सप्तम्बरमासस्य पञ्चमदिनाङ्कतः नवमदिनाङ्कं यावत् शिक्षकपर्व समाचरितम्। तत्र उद्घाटनकार्यक्रमे वाचस्पतिशर्मत्रिपाठिमहाभागः मुख्यातिथिरूपेण उपस्थितः। एवं अस्य पर्वणः विशेषकार्यक्रमे भारतसर्वकारस्य शिक्षामन्त्रालयस्य भूतपूर्वः शिक्षामन्त्री डॉ. रमेश पोखरियाल निशंक महाभागः समुपस्थितः आसीत्।




## हिन्दीपखवाडा

हिन्दीपखवाडाम् उपलक्ष्य कार्यालयकर्मचारिभ्यः विविधस्पर्धाः समायोजिताः। अपि च कार्यलयकर्मचारिणां कृते उद्बोधनकार्यशाला अपि समनुष्ठिता।



## संस्कृतसेवाव्रतिनां सम्माननम्

केन्द्रीयसंस्कृतविश्वविद्यालयेन संस्कृतसप्ताहमुपलक्ष्य अगस्तमासस्य एकादशदिनाङ्के आयोजिते विशिष्टे कार्यक्रमे संस्कृतसेवामुपलक्ष्य माननीयशिक्षाराज्यमन्त्रिणा डॉ. सुभाषसरकारमहोदयस्य करकमलाभ्यां विदुषां सम्माननं विहितम्। अस्मिन् कार्यक्रमे विश्वविद्यालयस्य कुलपतिः प्रो. श्रीनिवासवरखेडीवर्यः, दिनेशकामतवर्यः, श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृतविश्वविद्यालयस्य कुलपतिः मुरलीमनोहरपाठकः च उपस्थितः।






## द्विदिवसीया अन्ताराष्ट्रिया संगोष्ठी

केन्द्रीयसंस्कृतविश्वविद्यालये प्रमाणवार्तिकम्-बौद्धदर्शनन्याय-दर्शनयोः संवादः इति विषये द्विदिवसीया अन्ताराष्ट्रिया संगोष्ठी सप्तम्बरमासस्य 29-30 दिनाङ्कयोः संपन्ना। तत्र भारतस्य नेपालदेशस्य प्रथितविद्वांसः प्रतिभागिनश्च भागम् अगृह्णन् ।



## गङ्गानाथझापरिसरवार्ता

Department of Literature, Languages and Cultural Heritage- University of Cagliari, Sardinia, Italy इति संस्थाया अन्वेषकः श्रीमान् सुदीप्तमुंशीमहोदयः 01.03.2022 तः 03.06.2022 यावद् अस्माकं गङ्गानाथझापरिसरे प्रो. ललितकुमारत्रिपाठिमहोदयानां मार्गदर्शने अतिथि-अन्वेषकरूपेणाध्ययनमकरोत्। प्राक्शोधच्छात्राणां कृते अधोलिखितेषु विषयेषु व्याख्यानमपि अकार्षीत्।






10.4.2022 दिनाङ्के प्रातः 08 वादनतः 12.04.2022 दिनाङ्के रात्रौ 10 वादनपर्यन्तं रामनवमीमुपलक्ष्य श्रीमद्वाल्मीकिरामायणस्य अखण्डं पारायणं प्राचलत्।

19.04.2022 दिनाङ्काद् आरभ्य 23.04.2022 पर्यन्तं संस्कृतसङ्गणकभाषाविज्ञानकार्यशाला जाता। यत्र कोलकाता-स्थितस्य भारतीयसांख्यिकीसंस्थानस्य भाषा-अनुसन्धानविभागस्य विभागाध्यक्षा आचार्यनीलाद्रिशेखरदासमहोदयाः मुख्यवक्तारः आसन्।

10.4.2022 दिनाङ्के प्रातः 08 वादनतः 12.04.2022 दिनाङ्के रात्रौ 10 वादनपर्यन्तं रामनवमीमुपलक्ष्य श्रीमद्वाल्मीकिरामायणस्य अखण्डं पारायणं प्राचलत्। 19.04.2022 दिनाङ्काद् आरभ्य 23.04.2022 पर्यन्तं संस्कृतसङ्गणक-भाषाविज्ञानकार्यशाला जाता। यत्र कोलकातास्थितस्य भारतीयसांख्यिकीसंस्थानस्य भाषा-अनुसन्धानविभागस्य विभागाध्यक्षा आचार्यनीलाद्रिशेखरदासमहोदयाः मुख्यवक्तारः आसन्। 26.04.2022 दिनाङ्काद् आरभ्य 01.05.2022 पर्यन्तं पाण्डुलिपिप्रशिक्षणकार्यशाला आयोजिता। यत्र परिसरस्य सह-आचार्या डॉ. अपराजिता मिश्रा मुख्यप्रशिक्षिका आसीत्। 02.05.2022 दिनाङ्के "सामान्यभाषा-विज्ञानस्य परिचयः" इति विषयं समवलम्ब्य केरलविश्वविद्यालयस्य प्राच्य-अध्ययनसंकायस्य भाषाविज्ञानविभागस्य पारोमितानन्दी महोदया व्याख्यानं दत्तवती।



02.05.2022 दिनाङ्काद् आरभ्य 30.06.2022 तिथिपर्यन्तं भारतीयविद्या-ग्रन्थपाठमालायां काव्यशास्त्रीयग्रन्थपाठमालाकार्यक्रमे "काव्यप्रकाशः, प्रथमोल्लासतः चतुर्थोल्लासपर्यन्तम्" इति विषयं समवलम्ब्य जयपुरपरिसरस्य साहित्यविभागाध्यक्षाणा-माचार्यरामकुमारशर्मणां व्याख्यानमभवत्।

11.05.2022 दिनाङ्कात् 14-05-2022 पर्यन्तं इलाहाबाद-विश्वविद्यालयस्य संस्कृतविभागस्याध्यक्ष-चराणामाचार्यहरिदत्तशर्मणाम् व्याख्यानानि जातानि।






18.05.2022 तः 22.05.2022 यावत् "पाणिनीयव्याकरणे कारक-मीमांसा" इति विषये विभक्त्यर्थविचार इति शीर्षकं समवलम्ब्य काशीहिन्दूविश्वविद्यालयस्य संस्कृतविद्याधर्मविज्ञानसंकायस्य व्याकरण-विभागस्य सह-आचार्याणां डॉ. व्रजभूषणओझामहोदयानां व्याख्यानं जातम्।

23.05.2022 तः 30.05.2022 यावत् हस्तलेखशास्त्रप्रशिक्षणकार्यशाला आयोजिता। यत्र मुख्यवक्तारौ रघुनाथकीर्तिपरिसरस्य निदेशकः आचार्य-विजयपालशास्त्री तथा च गङ्गानाथझापरिसरस्य साहित्यविभागस्य सह-आचार्या डॉ. अपराजिता मिश्राऽस्ताम्।

31.05.2022 तः 14.06.2022 पर्यन्तम् अमृतमहोत्सवे अन्ताराष्ट्रिय- योगोत्सवे योगकार्यशाला आयोजिता। यत्र "वैश्विक परिदृश्य में योग एवं आयुर्वेद" इति विषयमधिकृत्य राजकीय आयुर्वेद महाविद्यालय हण्डिया प्रयागराजस्य संकायप्रमुखाः आचार्याः प्रो. गिरीन्द्रसिंहतोमरमहोदया व्याख्यानं दत्तवन्तः। 01.06. 2022 दिनाङ्के तोमरमहोदयाः "योग का मौलिक स्वरूप" इति विषयमादाय व्याख्यानमकुर्वन्। 02.06.2022 दिनाङ्के तोमरमहोदयाः "आयुर्वेद एवं योग" इति शीर्षकमाधाय व्याख्यानं दत्तवन्तः।





01.06.2022 तः 04.06.2022 पर्यन्तं मीमांसादर्शनग्रन्थपाठमाला आयोजिता। यत्र श्रीराजीवगान्धीपरिसरस्य मीमांसाविभागाध्यक्षा आचार्या सूर्यनारायणभट्टमहोदयाः अर्थसङ्ग्रहम् आश्रित्य व्याख्यानं दत्तवन्तः।

अवधानकलाव्याख्यानमालायां 16.06.2022 दिनाङ्के बेंगलूरुस्थितस्य चाणक्यविश्वविद्यालयस्य सहाचार्याः डॉ. रामकृष्णपेजत्तायमहोदया व्याख्यानं दत्तवन्तः।





केन्द्रीयसंस्कृतविश्वविद्यालयस्य माननीयानां कुलपतिमहोदयानाम् आचार्यश्रीनिवासवरखेडीमहोदयानां परिसरे मङ्गलकारिणी समुपस्थितिः सञ्जाता। तैः शोधस्य गुणवत्तामधिकृत्य व्याख्यानं दत्तम्। अत्र मुख्यातिथयः काशीहिन्दूविश्वविद्यालयस्य कुलपतिचराः अपि च उत्तरप्रदेशोच्चशिक्षा-परिषदः अध्यक्षाः प्रो. गिरीशचन्द्रत्रिपाठिवर्या भारतीयज्ञानविज्ञानविषयमधि-कृत्य अवोचन्। विशिष्टातिथयो राष्ट्रपतिपुरस्कृता इलाहाबादविश्व-विद्यालयस्य संस्कृतविभागाध्यक्षचराः आचार्यहरिदत्तशर्माणः 'साम्प्रतिक-धस्य समस्याः' इति विषयमधिकृत्य उदीरितवन्तः।

13.06.2022 दिनाङ्के अमरशहीदचन्द्रशेखर-आजादस्य प्रतिमायां माल्यार्पणं तथा च प्राक्शोधपाठ्यक्रमच्छात्राणां सांस्कृतिकप्रस्तुतिभिः संस्कृतज्ञवीरस्वातन्त्र्यस्मृतिव्याख्यानमालायाः शुभारम्भः सञ्जातः। शुभारम्भकार्यक्रमेऽस्मिन् आध्यक्ष्यं परिसरनिदेशका आचार्या ललितकुमारत्रिपाठिनोऽकुर्वन्। मुख्यातिथय इलाहाबादविश्वविद्यालयस्य संस्कृतविभागाध्यक्षचराः आचार्यहरिदत्तशर्माणः आसन्।





15.06.2022 दिनाङ्के उज्जयिनीस्थमहर्षिपाणिनिसंस्कृतवैदिकविश्व-विद्यालयस्य कुलपतयः आचार्यविजयकुमार सी.जी. महोदयाः व्याख्यानं दत्तवन्तः। विषयः आसीत् स्वतन्त्रतासङ्ग्रामे संस्कृतविदुषामवदानमिति।

एतस्यामेव व्याख्यानमालायां "Shishir Kumar Ghosh, Amrit bahar Patrika and the Indian National Movement" इति विषयमवलम्ब्य "Institute for Vaishnava Studies" संस्थाया निदेशकाः प्रो. अभिषेकघोषमहोदयाः व्याख्यानमकुर्वन्।



21.06.2022 दिनाङ्के अष्टमः अन्ताराष्ट्रिययोगदिवस आयोजितः, यत्र माननीयप्रधानमन्त्रिणां सन्देशः, सामान्ययोगाभ्यासक्रमः व्याख्यानसत्रञ्चेति कार्यक्रमा अभवन्।





## श्रीरणवीरपरिसरवार्ता

### अष्टमयोगदिवसः समनुष्ठितः

परिसरे जूनमासस्य 01 दिनाङ्कतः 21.06.2022 पर्यन्तं योगाभ्यासशिबिरस्य आयोजनं जातम्। एकविंशतिदिवसीयस्यास्य शिबिरस्योद्घाटनं जूनमासस्य प्रथमदिनाङ्के कार्यकारिनिदेशकैः प्रो. मनोजकुमारमिश्रमहोदयैः कृतम्। योगाभ्यासशिबिरान्तर्गतमेव 10.06.2022 दिनाङ्के जम्मूस्थकेन्द्रीयकारागारे कारागारास्थैः सह केन्द्रीयसंस्कृत- विश्वविद्यालयस्य माननीयैः कुलपतिवर्यैः प्रो. श्रीनीवासवरखेडीवर्यैः योगाभ्यासोऽकारि तत्र कुलपतिभिः सह केन्द्रीयकारागारस्य अधीक्षकाः श्रीवीरेन्द्रकुमारभट्टमहोदयाः अप्यासन्। तस्मिन् कार्यक्रमे अध्यक्षरूपेण परिसरनिदेशकानां प्रो. मदनमोहनझा- महोदयानामुपस्थितिरासीत्।

परिसरे कार्यक्रमस्याग्रिमायां शृङ्खलायाम् आन्ताराष्ट्रियं योगसम्मेलनमनुष्ठितम्। जूनमासस्य 18-19 दिनाङ्कयोः समनुष्ठितेऽस्मिन् सम्मेलने विविधदेशेभ्यः समुपस्थितैः योगशास्त्रविद्भिः ज्ञानगर्भितेन निजोद्बोधनेन योगस्य सन्मार्गप्रदर्शनमकारि। अस्य सम्मेलनस्य आयोजकाः केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीरणवीरपरिसरः इजिप्टदेशस्य अमीनट्रेडिशनल योग एण्ड मेडिटेशन-सेन्टर तथा कीव, यूक्रेनदेशस्य यूक्रेनियन्न-एसोसियशन आयुर्वेदा एण्ड योगनाम्नी संस्था च आसन्।

सम्मेलनेऽस्मिन् इजिप्ट साउदी-अरब, यूक्रेन, श्रीलङ्का, क्रोशिया, सीरिया, नेपालदेशेभ्य भारतदेशेभ्यश्च प्रतिभागिनः वक्तारश्च समवेता आसन्।





### जूनमासस्य 10 दिनाङ्के महाकविसुब्रह्मण्यभारतीशताब्दीसमारोहः समनुष्ठितः

जूनमासस्य 10 दिनाङ्के श्रीरणवीरपरिसरजम्मू-सांस्कृतिकविकासयुवाचेन्नई चेत्यनयोः तत्त्वावधाने तमिलप्रदेशस्य सुप्रसिद्धमहाकविसुब्रह्मण्यभारतीमहोदयस्य जन्मसमारोहान्तर्गत एकः कार्यक्रमः ऑनलाईन/ऑफलाईनमाध्यमेन चायोजितः। कार्यक्रमस्यास्योद्देश्यं महाकविसुब्रह्मण्यभारतीमहोदयस्य योगदानं वैश्विकस्तरे प्रकाशनम् आसीत्। कार्यक्रमेऽस्मिन् विशिष्टातिथयः श्रीरामकृष्णमठस्य प्रबन्धकाः स्वामिधर्मिष्ठानन्दमहाशयाः आसन्। सारस्वतातिथयः मेजर जनरल जी.डी. बक्शीमहोदयाः आसन्।

### अभिनवगुप्तजयन्तीसमारोहः

जूनमासस्य 11 एकादशदिनाङ्के परिसरेऽस्मिन् अभिनवगुप्तजयन्तीसमारोहस्यायोजनमुत्साहपूर्वकमभूत्। कार्यक्रमस्य मुख्यातिथयः केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतयः प्रो. श्रीनिवासवरखेडीमहोदया आसन्। सारस्वतातिथयः परिसरस्यास्य प्राचार्यचराः पद्मश्रीः इत्याख्यानेन सम्मानेन समलङ्कृताः प्रो. विश्वमूर्तिशास्त्रिमहाशयाः आसन्, मुख्यवक्तारः प्रो. मनोजकुमारमिश्राः आसन् विशिष्टवक्तारौ डॉ. महेशकौलसञ्जयरैनामहोदयावास्ताम्। कार्यक्रमस्याध्यक्षाः परिसरनिदेशकाः प्रो. मदनमोहनझावर्याः आसन्।

### 13-21 जून 2022 यावत् सप्तदिवसीयसंस्कृतज्ञस्वात्रन्त्र्यवीरस्मृतिव्याख्यानमाला

केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीरणवीरपरिसरेण स्वातन्त्र्यामृतमहोत्सवान्तर्गतायाः सप्तदिवसीयसंस्कृतज्ञस्वातन्त्र्यवीरस्मृतिव्याख्यान-मालायाः जूनमासस्य त्रयोदशदिनाङ्काद् आरभ्य एकविंशतितमदिनाङ्कपर्यन्तम् आयोजनं कृतमासीत्।

## श्रीसदाशिवपरिसरवार्ता

### उत्कलदिवसोत्सवः ( 01.04.2022 )

उत्कलप्रदेशे विद्यमाने श्रीसदाशिवपरिसरे प्रादेशिक-गौरवपूर्णकार्यक्रमान्तर्गतः उत्कलदिवसोत्सवः परिपालितः। निदेशकमहोदयाः प्रो. खगेश्वरमिश्रवर्याः उत्कलस्य स्थापनाविषये प्रदेशगठनविषये उत्कलस्य गौरवं महिमानं छात्रान् सदस्यान् सम्बोधितवन्तः।

### वार्षिकक्रीडामहोत्सवः ( 02.04.2022 )

परिसरीय-वार्षिकक्रीडामहोत्सवः 02.04.2022 दिनाङ्के परिपालितः। अत्र छात्राणां विविधाः क्रीडाप्रतियोगिताः शारीरिकशिक्षाप्राध्यापकस्य डॉ. प्रियजितमहापात्रस्य संयोजकत्वेन आयोजिताः।





### श्रीमद्वाल्मीकीयरामायणसुन्दरकाण्डपारायणमहोत्सवः ( 12.04.2022 )

12.04.2022 दिनाङ्के चैत्रशुक्ले मासे एकादश्यां तिथौ भौमवासरे श्रीमद्वाल्मीकीयरामायणसुन्दरकाण्डपारायणमहोत्सवः समायोजितः। अवसरे अस्मिन् निदेशकानां मार्गदर्शनेन परिसरस्य सदस्याः समुपस्थितवन्तः।




### शिक्षाशास्त्रीयराष्ट्रियसंगोष्ठी ( 3-5 मई 2022 )

भारतीयज्ञानपरम्परा राष्ट्रियशिक्षानीतिः 2020 च इति विषयम् आधारीकृत्य परिसरस्य शिक्षाशास्त्रविभागेन त्रिदिवसीया (3-5 मई 2022) राष्ट्रिया शोधसङ्गोष्ठी आयोजिता। संगोष्ठ्याः संयोजकः प्रो. देवदत्तसरोडे, सह-संयोजकौ श्रीरमाकान्त सा डॉ. सुशान्तहोता च आसन्। सङ्गोष्ठीयं आनलाईन-आफलाईन-माध्यमेन प्रचालिता। सङ्गोष्ठ्याः उद्घाटनसत्रे मुख्यातिथिः पुरीस्थ-श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य प्राक्तनः कुलपतिः प्रो. किशोरचन्द्रपाढी, विशिष्टातिथि कटकस्य-रेवेन्शाविश्वविद्यालयस्य प्रो. सुदर्शनमिश्रः, अध्यक्षः परिसरस्य निदेशकः प्रो. खगेश्वरमिश्रः विभागाध्यक्षः प्रो. विजयपालकच्छवाहः च आसन्। अस्यां संगोष्ठ्यां विशिष्टानां विदुषां व्याख्यानानि सम्पन्नानि। तेषु प्रो. सच्चिदान्दमिश्रः, प्रो. भुजेन्द्रनाथपण्डा, प्रो.आर.पी.पाठकः, डॉ. सुमनठाकरः, प्रो. चाँदकिरणसलूजा, प्रो. सुदेश कुमारशर्मा एते अन्यतमाः आसन्।

### सामाजिकचेतनाशोभायात्रा वीथीनाटकं च ( 10.05.2022 )

जनेषु संस्कृतभाषां प्रति सकारात्मकम् अभिवृत्ति-सम्पादनं, पर्यावरणस्य संरक्षणं, स्वच्छतायाः परिपालनं, भ्रष्टाचारस्य उन्मूलनं, गमनागमननियमानां परिपालनम् इत्यादीनां प्रमुखविषयाणां समुद्घोषणम् अस्यां शोभायात्रायां प्रदर्शितम्।

### कलाशिल्पकार्यशाला ( 10-12 मई 2022 )

श्रीसदाशिवपरिसरे शिक्षाशास्त्रविभागपक्षतः त्रिदिवसीयराष्ट्रिया कलाशिल्पकार्यशाला समायोजिताभवत्। 10.05.22 दिनाङ्कादारभ्य 12.05.22 दिनाङ्कपर्यन्तम् इयं कार्यशाला प्राचलत्।




## क्रीडासांस्कृतिकसहगामिकार्यक्रमः
## ( 14-16 मई, 2022 )

श्रीसदाशिवपरिसरेण सह बालि-आपाल-शारीरिकशिक्षामहाविद्यालयः विविधक्रीडां सांस्कृतिकगतिविधिं परिसरस्य छात्रैः सह सम्भूय महता आडम्बरेण समाचरितम्।



## संस्कृतज्ञस्वातन्त्र्यवीरस्मृतिव्याख्यानमाला
## ( 08-15.06. 2022 )

केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीसदाशिव-परिसरस्य निदेशकानाम् आचार्यखगेश्वरमिश्रमहोदयानां मार्गनिर्देशनेन संस्कृतज्ञस्वातन्त्र्य-वीरस्मृति-व्याख्यान-माला 08.06.2022 तः 15.06.2022 पर्यन्तम् अपराह्णे 3.30 वादनतः प्रतिदिनं प्रवृत्ता।


## रुधिरदानशिबिरम् ( 25.05.2022 )

श्रीसदाशिवपरिसरेण सह निर्माल्यम्-संस्थायाः संयुक्ततत्त्वावधानेन 25. 05.2022 दिनाङ्के परिसरस्य जयदेवभवने सामाजिककार्यक्रमरूपेण रुधिरदान-शिबिरम् सम्पन्नम्। अस्मिन् अवसरे पुरीनगरस्य वरिष्ठसमाजसेवकाः श्रीमन्तः वद्रीमिश्रमहोदयाः श्रीमन्तः चक्रधरमहापात्रमहोदयाः मुख्यतिथिरूपेण स्थानम् अलङ्कृतवन्तः। अत्र परिसरस्य अन्तेवासिभ्यः 90 Unit रुधिरं संगृहीतम्।

## संस्कृतनाट्यप्रस्तुतिः - भगवदज्जुकम् ( 30.05.2022 )

परिसरस्य कुशीलवैः 30.05.22 दिनाङ्के पुरीस्थ-अन्नपूर्णा-प्रेक्षागारे बोधायनप्रणीतं भगवदज्जुकम् इति प्रहसनं प्रस्तुतम्। श्रीसदाशिवपरिसरः The Catch (द कैच) - श्रीनाट्यम्- संस्थाभ्यां सह सहगामिकार्यक्रमरूपेण पुरीनगरे बहुकालात् परं संस्कृतं नाट्यम् आयोजितवान्।





## विश्वपर्यावरणदिवसः ( 05.06.2022 )

श्रीसदाशिवपरिसरे विश्वपर्यावरणदिवसः छात्रैः सदस्यैः सह वृक्षरोपणेन पर्यावरणस्य महत्त्वप्रतिपादने परिपालितः। अत्र परिसरनिदेशकेन पर्यावरणस्य संरक्षणं महत्त्वं च अभिभाषितम्।





## विश्व-योगदिवस-समागमः ( 21-22 जून 2022 )

परसरेऽस्मिन् विश्वयोदिवसम् उपलक्ष्य व्यापकः कार्यक्रमः समायोजितः। अस्य उद्घाटनसमारोहे प्रवक्ता डॉ. संवित्-पात्र-महाशयः सम्बोधितवान्। पुरीस्थ-श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य कुलपतिचरः प्रो. नीलकण्ठ-पतिमहोदयः मुख्यातिथित्वेन योगविद्यायाः पारम्परिकं वैशिष्ट्यं प्रतिपादितवान्।

## राज भाषा के लिए विश्वविद्यालय को एक राष्ट्रीय समिति बनानी चाहिए: CSU कुलपति प्रो वरखेड़ी



टेन न्यूज़ नेटवर्क

**नई दिल्ली (14/06/2022):** केन्द्रीय संस्कृत विश्वविद्यालय, दिल्ली के कुलपति प्रो श्रीनिवास वरखेड़ी की अध्यक्षता में सोमवार को राज भाषा से जुड़े त्रैमासिक बैठक की गयी । कुलपति प्रो वरखेड़ी ने विश्वविद्यालय में राज भाषा के नियम के अनुपालन में कार्यालय से जुड़ी गतिविधियों की समीक्षा की और यह भी बताया कि इस विश्वविद्यालय के गैर हिंदी प्रदेश क्षेत्र – श्रृंगेरी या अगरतला आदि प्रदेशों में इसके अनुपालन को लेकर भी जानकारी ली और बताया कि अगरतला जैसे क्षेत्रों में इस विश्वविद्यालय का परिसर संतोष जनक कार्य कर रहा है ।

साथ ही साथ उन्होंने यह भी कहा कि विश्वविद्यालय को इस नियम के अनुसार नियुक्ति के लिए समय पर विज्ञापन निकाल कर इस दिशा में समुचित कार्यवाही भी करनी चाहिए ।

## ...ार के लिए विशेष योजना की जरूरत



...त्य
...वविद्यालय,
प्रो. श्रीनिवास
...क्षता में सोमवार
...ड़े लोगों की
आयोजित की गयी।
...श्वविद्यालय में
...यम के अनुपालन में
...ड़ी गतिविधियों की
...र यह भी बताया कि
...ालय के गैर हिंदी प्रदेश
...ा अगरतला आदि
...के अनुपालन को लेकर
...री ली और बताया कि
जैसे क्षेत्रों में इस
...ालय का परिसर
...क कार्य कर रहा है।
...ही उन्होंने यह भी कहा कि
...द्यालय को इस नियम के
...र नियुक्ति के लिए समय पर

विज्ञापन निकाल कर इस दिशा में समुचित कार्यवाही भी करनी चाहिए। कुलपति प्रो वरखेड़ी ने यह भी कहा कि हिन्दी भाषा के प्रचार प्रसार के लिए यह भी आवश्यक है कि कार्यालय स्तर पर हिन्दी में प्रशंसनीय कार्य करने वाले के लिए हिन्दी दिवस पर विशेष पुरस्कार योजना बनाने की जरुरत है। उनका यह भी मानना था कि केन्द्रीय संस्कृत विश्वविद्यालय, दिल्ली के परिसर देश के अनेक राज्यों में अवस्थित हैं।

...कुलपति प्रो वरखेड़ी ने यह भी कहा कि हिन्दी भाषा के प्रचार प्रसार के लिए यह भी आवश्यक है कि कार्यालय स्तर पर हिन्दी प्रशंसनीय कार्य करने वाले के लिए हिन्दी दिवस पर विशेष पुरस्कार योजना बनाने की जरुरत है । उनका यह भी मानना था कि केन्द्रीय संस्कृत विश्वविद्यालय दिल्ली के परिसर देश के अने... राज्यों में अवस्थित हैं ।अतः अपने विश्वविद्यालय में राज भाषा ... समुचित ढंग से लागू करने के लिए आवश्यक है कि इसके लिए एक राष्ट्रीय स्तर पर समिति बनायी जाय ।



विश्वविद्यालय के अरुण कुमार विद्यार्थी, परामर्श दाता, राज भाष... ने पिछले बैठक की रिपोर्ट तथा उसके कार्यालय स्तर प्रगति पर प्रकाश डाला तथा डा देवानन्द शुक्ल, प्रभारी राज भाषा ने भी अपने विचार रखे।

इनके अलावा इस नव गठित राज भाषा समिति के अन्य सदस्यों के अतिरिक्त, प्रो बनमाली बिस्वाल, डायरेक्टर एकेडमिक अफ्य... मधुकेश्वर भट्ट, प्रभारी वित्त विभाग, डा रत्न मोहन झा, निदेशक, मुक्त स्वाध्याय केन्द्र, रोहतास सिंह, परीक्षा उपनियंत्रक, जितेन्द्र कुमार तथा सहायक निदेशक, शोध एवं प्रकाशन आदि अनेक अधिकारी भी उपस्थित रहें ।

4 वीर अर्जुन, नई दिल्ली, 10 मई, 2022

### उत्कर्ष महोत्सव के सम्पूर्ति दिवस का शुभारंभ

### जहांगीरपुरी में नियमित प्रशासनिक कवायद को अनुचित सांप्रदायिक रंग दिया गया : निगम ने अदालत से कहा

### नशे की राजधानी बन चुकी है दिल्ली : राजेन्द्र पाल

Renault Triber
Ad Ultra-modularity and unmatched comfort comes as ...
BOOK NOW

# दैनिक जागरण

राजधानी
मूल्य ₹ 5.00
पृष्ठ 22+8=30
www.jagran.com

## पश्चिमी दिल्ली

उत्कर्ष दिवस पर जुटेंगे संस्कृत के विद्वान : प्रो. वरखेड़ी

संस्कृत विश्वविद्यालय के बीच हुआ अकादमिक समझौता

### क्या है केंद्रीय संस्कृत विश्वविद्यालय...



बीरपुर स्थित वैदिक विज्ञान केंद्र के बाहर पौधारोपण करते लोग • जागरण

# पत्रिका

नई दिल्ली
Published: May 06, 2022 07:04:01 pm

**नई दिल्ली।** केन्द्रीय संस्कृत विश्वविद्यालय नई दिल्ली की ओर से 'उत्कर्ष महोत्सव' का आयोजन किया जा रहा है। शुक्रवार को आयोजित एक संवाददाता सम्मेलन में इसकी जानकारी दी गई। संस्कृत के तीनों विश्वविद्यालयों केंद्रीय संस्कृत विवि नई दिल्ली, लाल बहादुर शास्त्री राष्ट्रीय संस्कृत विश्वविद्यालय नई दिल्ली और राष्ट्रीय संस्कृत विश्वविद्यालय तिरुपति की ओर से संयुक्त रूप से 'उत्कर्ष महोत्सव' का आयोजन दिल्ली के अम्बेडकर अंतरराष्ट्रीय केंद्र में 7 से 9 मई तक किया जाएगा। तीन दिवसीय उत्कर्ष महोत्सव का आयोजन कुलपति प्रो. श्रीनिवास वरखेड़ी के नेतृत्व में किया जाएगा। उत्कर्ष महोत्सव का मुख्य उद्देश्य संस्कृत भाषा का प्रचार-प्रसार और संवद्र्धन करना है, जिसकी विषय वस्तु 'नए शैक्षिक युग में संस्कृत अध्ययन का वैश्विक उन्मुखीकरण' रखी गई है।




Connect to the World
Start connecting and sharing with people you know. See the latest from your community.
Facebook®
Visit Site



न्यूज़

## राज भाषा के लिए विश्वविद्यालय को एक राष्ट्रीय समिति बनानी चाहिए- कुलपति प्रो वरखेड़ी

June 13, 2022 admin Comment(0)

Report ring Desk

नई दिल्ली। केन्द्रीय संस्कृत विश्वविद्यालयए दिल्ली के कुलपति प्रो श्रीनिवास वरखेड़ी की अध्यक्षता में राज भाषा से जुड़े त्रैमासिक बैठक का आयोजन किया गया, बैठक में कुलपति वरखेड़ी ने विश्वविद्यालय में राज भाषा के नियम के अनुपालन में कार्यालय से जुड़ी गतिविधियों की समीक्षा की और बताया कि इस विश्वविद्यालय के गैर हिंदी प्रदेश क्षेत्र – श्रृंगेरी या अगरतला आदि प्रदेशों में इसके अनुपालन को लेकर भी जानकारी ली और बताया कि अगरतला जैसे क्षेत्रों में इस विश्वविद्यालय का परिसर संतोष जनक कार्य कर रहा है।

# राजीवगान्धीपरिसरवार्ता

परिसरस्य वार्षिकोत्सवः 26-04-2022 दिनाङ्के शृङ्गेरीशारदा-पीठाधीश्वराणां जगद्गुरुशङ्कराचार्याणां श्री श्री भारतीतीर्थमहास्वामिनां परमानुग्रहेण श्रृङ्गेरी-शारदापीठाधीश्वराणां जगद्गुरुशङ्कराचार्याणां श्री श्री विधुशेखरभारतीमहास्वमिनां दिव्योपस्थितौ सम्पन्नः। मैसूरू राजमाता श्रीमती प्रमोदा देवी ओडेयार् महोदया मुख्याभ्यागतरूपेण जयपुरपरिसरस्य साहित्यविभागस्य आचार्यः रमाकान्त पाण्डेयवर्यः विशिष्टाभ्यागतरूपेण च आगत्य छात्रेभ्यः पुरस्कारान् व्यतरताम्।





परिसरस्य शिक्षाशास्त्रविभागस्य आचार्यचराणां राष्ट्रियसंस्कृत-संस्थानस्य कुलपतिचराणां राजीवगान्धीपरिसरस्य प्राचार्यचराणां प्रो. ए.पि. सच्चिदानन्दमहोदयानां सेवानिवृत्तिमुपलक्ष्य सौप्रस्थानिककार्यक्रमः 27-05-2022 दिनाङ्के केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतिचराणाम् आचार्य परमेश्वरशास्त्रिणाम् अन्येषां च विशिष्टानां विदुषां समुपस्थितौ वैभवेन समाचरितः।

28-05-2022 दिनाङ्के विविधासु स्पर्धासु प्राप्तपुरस्काराणां छात्राणाम् अभिनन्दनात्मकः वाग्वर्धिनीमहोत्सवः सम्पन्नः। तत्र कालीकट् विश्वविद्यालयस्य संस्कृतविभागस्य आचार्याः सुन्दरेशन्महोदयाः "वाग्" इति विषये विशिष्टं व्याख्यानं व्यदधुः। परिसरच्छात्रैः "वीरपृथ्वीराजनाटकम्" अभिनीतम्।



15-06-2022 तः 21-06-2022 पर्यन्तं "योगसप्ताह" कार्यक्रमः आयोजितः। अयं कार्यक्रमः विशिष्टव्याख्यानम्, संगोष्ठी योगप्रशिक्षणमिति त्रेधा समायोजितः। शिक्षाशास्त्रविभागस्य आचार्यः प्रो. रामचन्द्रुलबालाजीवर्यः अत्र प्रधानसंयोजकः। केन्द्रीयसंस्कृत-विश्वविद्यालयस्य मान्यैः कुलपतिभिः प्रो. श्रीनिवासवरखेडीवर्यैः संगोष्ठ्याः उद्घाटनभाषणम् अन्तर्जालमाध्यमेन विहितम्।

## छात्राणामुपलब्धयः

08-04-2022 दिनाङ्के संस्कृतभारत्या वाराणस्यां समायोजितायामखिलभारतीयज्यौतिषशालाकापरीक्षायां श्री विवेक त्रिपाठी प्रथमस्थानं प्राप्नोत्, श्री सुधांशुशुक्लश्च तृतीयं स्थानमलभत।

## राष्ट्रियसङ्गोष्ठी


29-04-2022, 30-04-2022 दिनाङ्कयोः "शैक्षिकप्रशासने शिक्षाशास्त्रस्य प्रभावः" इति विषये राष्ट्रियसंगोष्ठी शिक्षाशास्त्रविभागीययोः डॉ. वेङ्कटरमणभट्टः, डॉ. नारायणवैद्ययोः संयोजकत्वेन संपन्ना।

14-06-2022 दिनाङ्के डॉ. नारायणवैद्यवर्यस्य संयोजकत्वे परिसरे रक्तदानशिबिरं समायोजितम्।

# श्रीरघुनाथकीर्तिपरिसरवार्ता

## अष्टमः योगदिवसः समाचरितः

श्रीरघुनाथ-कीर्तिपरिसरेणायं कार्यक्रमः 11 जूनतः 21 जूनपर्यन्तमेकादश- दिवसात्मकः समायोजितः। तत्र योगाभ्यासस्य कार्यक्रमः छात्रवासे आचरितः। तत्र कार्यक्रमसंयोजकेन गौतमचौधरिणा योगाभ्यासः कारितः तत्र च डॉ. अनिलकुमारः, डॉ. अरविन्दगौर अपि आस्ताम्। एवं योगविषयमधिकृत्य प्रो. विजयपालशास्त्रिणो व्याख्यानमभवत्। आई.पी.एस. अधिकारिणां डॉ. बी.के. उपाध्यायमहोदयानामुद्बोधनं जातम्। दिल्लीविश्वविद्यालयस्य प्रो. प्रदीपकुमारस्य योगस्य वैज्ञानिकताविषये व्याख्यानं जातम्। अन्तिमे दिवसे विशिष्टकार्यक्रमः समापनस्य समायोजितः तस्मिन् कार्यक्रमे केन्द्रीयसंस्कृतविश्वविद्यालयस्य यशस्विनः कुलपतयः प्रो. श्रीनिवासवरखेडीमहोदयाः समुपस्थिता आसन्। कुलपतिमहोदयैः सह निदेशकमहोदयेन सर्वैः परिसरस्य छात्रैः प्राध्यापकैः कर्मचारिभिश्च योगाभ्यासः कृतः।





## उद्योगोपलब्धिः

मई मासस्य 31 दिनाङ्के 2022 मध्ये श्री कृपारामशर्मणः शोधच्छात्रस्य उत्तराखण्ड लोकसेवाआयोगे प्रवक्तापदे चयनं जातम्।

## नूतनच्छात्रावासे प्रवेशः

श्रीरघुनाथकीर्तिपरिसरे विविधेभ्यः प्रान्तेभ्यः छात्राः समागत्य अध्ययनं कुर्वन्ति, परिसरस्य नूतनं भवनं प्रायशः निर्मितम्, यत्र च आहत्य 6 छात्रवासाः सन्ति, तेषु एकः बालिकाभ्योऽपि वर्तते। भारतसर्वकारस्य "सीपीडब्ल्यूडी" द्वारा सम्पूर्णपरिसरभवनस्य निर्माणमभवत्।

## शैक्षणिकगतिविधयः

व्यवसायिकपौरोहित्यप्रशिक्षणवर्गस्यायोजनम्- केन्द्रीयसंस्कृतविश्वविद्यालयस्य वित्तीयसहयोगेन श्रीरघुनाथकीर्तिपरिसरस्य वेदविभागेन आन्तरिकगुणवत्ताप्रकोष्ठेन च 21दिनात्मकः 08.03.2022 दिनाङ्कात् 27.03.2022 दिनाङ्कापर्यन्तं पौरोहित्यप्रशिक्षणकार्यशाला आनलाइन-माध्यमेन समाचरिता।

## परिसरे नवनिदेशकस्यागमनम्

जूनमासस्य 14 दिनाङ्के श्रीरघुनाथकीर्तिपरिसरे नवदेशकरूपेण लखनऊपरिसरस्य शिक्षाविभागस्याचार्याः प्रो. एम.चन्द्रशेखर-महोदयाः पदमलङ्कृतवन्तः।



# गुरुवायूर्-परिसरवार्ता

**साहित्यिकदिवसस्याचरणम्** - 12.05.2022 तः 13.05. 2022 दिनाङ्कयोः केन्द्रीयसंस्कृतविश्वविद्यालयस्य गुरुवायूर्-परिसरेण साहित्यिकदिवसः समाचरितः। अस्य कार्यक्रमस्य संयोजकः शिक्षाशास्त्रविभागाध्यक्षः आचार्यः के.के. शैन् वर्यः आधुनिकविभागीया आङ्ग्लाध्यापिका षीबामहोदया च सहसंयोजिका आसीत्।



**शिक्षाशास्त्रविभागीया द्विदिवसीया राष्ट्रिया सङ्गोष्ठी विशिष्टव्याख्यानमालायाः आयोजनञ्च-** केन्द्रीयसंस्कृत-विश्वविद्यालयस्य गुरुवायूर्-परिसरस्य शिक्षाशास्त्राविभागेन 16/05/2022तथा 17/05/2022 दिनाङ्कयोः एकविंशतिशताब्द्यां संस्कृतशिक्षा-प्रत्याह्वानानि सम्भावनाश्च इति विषयमादाय द्विदिवसीया राष्ट्रिया सङ्गोष्ठी अनुष्ठिता। तत्र आचार्यः एम्. वि. नटेशन् महोदयः, आचार्यः चन्द्रकान्तमहोदयः, आचार्यः ई. एम्. राजन् महोदयः निदेशकः, आचार्यः रामचन्द्रुलबालाजीमहोदयः च विशिष्टवक्तृत्वेन विविधसत्रेषु स्वीयान् विचारान् प्रास्ताविषुः। समापनसमारोहे केन्द्रीयसंस्कृतविश्वविद्यालयस्य राजीवगान्धी-परिसरस्य शिक्षाशास्त्रविभागस्य आचार्यः रामचन्द्रुलबालाजीमहोदयः मुख्यातिथिः आसीत्, संस्कृतभारतीति सङ्घटनस्य अखिलभारत-सम्पर्कप्रमुखः विश्वविभागसंयोजकश्च वाचस्पतिः प. नन्दकुमारः महोदयः सारस्वतातिथिः आसीत्। कार्यक्रमस्य अध्यक्षः परिसरनिदेशकः आचार्यः ई. एम्. राजन् महोदयः आसीत्।



**परिसरे नवनिदेशकानां कार्यभारग्रहणम्-** 20-06-2022 दिनाङ्के गुरुवायूर्परिसरस्य आचार्यः ललितकुमारसाहुमहोदयः निदेशकपदस्यकार्यभारम् अगृह्णात्।



**विशिष्टव्याख्यानमाला राष्ट्रियसङ्गोष्ठी च।** अद्वैतवेदान्तविभागाध्यक्षाणाम् आचार्याणां प्रो. सुब्बरायडुवर्याणाम् अभिनन्दनकार्यक्रमरूपेण दिनद्वयात्मिका राष्ट्रियसङ्गोष्ठी उपनिषत्प्रमेयविचारः इति विषये अद्वैतवेदान्तविभागेन मेमासस्य 30-05-2022 तथा 31-05-2022 दिनाङ्कयोः सञ्चालिता। विशिष्टव्याख्यानस्य राष्ट्रियसङ्गोष्ठ्याः उद्घाटनञ्च तिरुपतिस्थराष्ट्रियसंस्कृतविश्वविद्यालयस्य वेदान्तविभागाचार्येण प्रो. के. गणपतिभट्टमहोदयेन कृतम्। 31.05.2022 दिनाङ्के मध्याह्ने समायोजिते समापनसमारोहे केन्द्रीयसंस्कृतविश्वविद्यालयस्य समादरणीयः कुलपतिवर्यः आचार्यः श्रीनिवासवरखेडीमहोदयः सारस्वतभाषणम् अकरोत्।





**ललितकलादिवसः-** केन्द्रीय-संस्कृत-विश्वविद्यालयस्य गुरुवायूर्-परिसरेण 18.05.2022 तः 19.05.2022 दिनाङ्कयोः ललित-कलादिवसः आचरितः। अत्र छात्रैः सर्वेषु कार्यक्रमेषु सोत्साहं भागः स्वीकृतः। अत्र डॉ. रामचन्द्रजोइसमहोदयः संयोजकः सङ्गणाध्यापिका मणिचित्रा महोदया च सहसंयोजिका आसीत्।

**क्रीडास्पर्धा -** परिसरच्छात्राणां क्रीडास्पर्धा 23/24.05.2022तमदिनाङ्कयोः छात्रकल्याणसमितिना निदेशकस्य ई.एम्.राजन्. महोदयस्य निर्देशानुसारं समायोजिता। अस्य कार्यक्रमस्य संयोजकः शिक्षाशास्त्रविभागीयाध्यापकः डॉ. प्रभलः विद्याधरमहोदयः सहसंयोजिका च आधुनिकविभागीया अध्यापिका डॉ. रम्या पी.आर्. महोदया चासीत्।

**वार्षिकमहामहः -** गुरुवायूर्- परिसरस्य ऐषमः वार्षिकमहामहः मेमासस्य २७तमे दिनाङ्के छात्रकल्याणसमितिद्वारा समायोजितः। कार्यक्रमेऽस्मिन् विशिष्टातिथिः उद्घाटकः च आसीत् श्री. अक्षय् राधाकृष्णन् प्रशस्तः मलयालचलचित्राभिनेता, तत्र सारस्वतातिथिः डॉ. के. एस्. महेश्वरन् महोदयः (मद्रपुरीसंस्कृतमहाविद्यालयस्य)।

**पर्यावरणजागरूकतादिवसः -** 02.06.2022 तः 03.06.2022 पर्यन्तं परिसरेण पर्यावरणजागरुकतायै कार्यक्रमः चालितः। अस्मिन् परिसरस्याध्यापकाः कर्मचारिणः च सोत्साहं भागमगृह्णन्।

**संस्कृतज्ञस्वातन्त्र्यवीरस्मृतिव्याख्यानमाला-** 14.06.2022 तः 22.06.2022 पर्यन्तं दक्षिणभारतस्थस्वातन्त्र्यवीरान् अधिकृत्य इयं व्याख्यानमाला आयोजिता परिसरेण।

**अन्ताराष्ट्रिययोगदिवसः-** परिसरेस्मिन् निदेशकस्य आचार्यस्य ललितकुमारसाहुमहोदयस्य निर्देशेन सर्वेषां छात्राणाम् अध्यापकानाञ्च सहकारेण अन्ताराष्ट्रिययोगदिवसः आचरितः।

## लखनऊपरिसरवार्ता

**संस्कृतरथयात्रा -** केन्द्रीयसंस्कृतविश्वविद्यालयस्य लखनऊपरिसरेण अगस्तमासस्य 08 दिनाङ्कात् 14 दिनाङ्कं यावत् संस्कृतसप्ताहमहोत्सवः समाचर्यते। अस्य महोत्सवस्य अङ्गतया संस्कृतरथयात्रा तथा सांस्कृतिकसङ्गीतसन्ध्याकार्यक्रमश्च समायोजितः।



### संस्कृतसप्ताहचरणम्

केन्द्रीयसंस्कृतविश्वविद्यालयस्य लखनऊपरिसरेण स्वतन्त्रतायाः अमृतमहोत्सवम् उपलक्ष्य प्रतिगृहं राष्ट्रध्वजकार्यक्रमः तथा संस्कृतसप्ताहस्य उद्घाटनकार्यक्रमश्च समायोजितः। कार्यक्रमेऽस्मिन् मुख्यातिथित्वेन उत्तरप्रदेशशासनस्य प्रमुखसचिवाः श्रीदुर्गाशङ्करमिश्रमहोदयाः समागताः। कार्यक्रमस्य अध्यक्षपदं परिसरनिदेशकः प्रो. सर्वनारायणझामहोदयः निरूढवान्। छात्राणां कृते संस्कृतभाषासम्बन्धिन्यो विविधाः स्पर्धाः समायोजिताः।







# जयपुरपरिसरवार्ता




छात्रेभ्यः पुरस्कारं प्रायच्छन् वार्षिकोत्सवस्य मुख्यातिथिः प्रो. सी.जी. विजयकुमारः (कुलपतिः, महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयः, उज्जयिनी), परिसरनिदेशकमहोदया प्रो. भगवती–सुदेशः।

अखिलभारतीयशास्त्रस्पर्द्धायां शास्त्रार्थे पुरस्कृतयोः छात्रयोः विपाशाजैन–अभिषकशर्मणोः सम्माननं कुर्वन्तः अतिथयः।





केन्द्रीयसंस्कृतविश्वविद्यालयः साहित्य–अकादमी, नईदिल्ली इत्यनयोः संयुक्ततत्त्वावधाने 'स्वातन्त्र्यसंग्रामे रामायणभगवद्गीतयोः प्रभावः' इति विषये समायोजितायाः राष्ट्रियशोधसंगोष्ठ्याः समापनकार्यक्रमे मञ्चे विराजन्ते वामतः।

प्रो. सुदेशकुमारशर्मा, डॉ. एन्. सुरेशबाबू प्रो. सी.जी. विजयकुमारः (कुलपतिः, महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयः, उज्जयिनी), परिसर–निदेशिका प्रो. भगवतीसुदेशः, प्रो. अभिराजराजेन्द्रमिश्रः, प्रो. रमाकान्तपाण्डेयः।

केन्द्रीयसंस्कृतविश्वविद्यालयः साहित्य–अकादमी, नईदिल्ली इत्यनयोः संयुक्ततत्त्वावधाने 'स्वातन्त्र्यसंग्रामे रामायण–भगवद्गीतयोः प्रभावः' इति विषये समायोजितायाः राष्ट्रियशोध–संगोष्ठ्याः उद्घाटनकार्यक्रमे पद्मश्रीसभाजितानां प्रो. अभिराज–राजेन्द्रमिश्रवर्याणां सम्माननं कुर्वन्तः अधिकारिणः।






अन्ताष्ट्रियोगदवसमुपलक्ष्य परिसरे नैके कार्यक्रमाः सम्पन्नाः।



विश्वपर्यावरणदिवसे परिसरप्राङ्गणे वृक्षकारोपणं कुर्वन्तः IQAC समन्वयकाः प्रो सुदेशकुमारशर्माणः।

# वेदव्यासपरिसरवार्ता

## राज्यस्तरीया योगस्पर्धा

सितम्बरमासस्य 11-12 दिनयोः सोलनजनपदस्य बद्दीनामके स्थाने हिमाचलप्रदेशस्य योगस्य नवदशी राज्यस्तरीया स्पर्धा आयोजिताभूत्। अस्यां परिसरस्य छात्राः सोत्साहं प्रतिभागम् अकुर्वन् पुरस्कारान् च प्राप्नुवन्। तत्र मनीषकुमारः स्वर्णपदकं, साहिलः स्वर्णपदकं, चिरागशर्मा रजतपदकं, आरती रजतपदकं, अंशुलः रजतपदकं विशालगौतमश्च कांस्यपदकं प्राप्तवान्।





## विशिष्टव्याख्यानम्

01जुलै 2022 दिने अपराह्णे 1:00 वादनतः वेदव्यासपरिसरे कुलपतिनां संरक्षकत्वे परिसरनिदेशकानाम् आध्यक्षे च पूज्यानां ब्रह्मश्री वंशीकृष्णघनपाठिनां विशिष्टव्याख्यानम् आयोजितम्। कार्यक्रमस्य अस्य संयोजकः आन्तरिकमूल्याङ्कनपरिषदः वेदव्यासपरिसरसंयोजकः ज्योतिषिविभागाध्यक्षः प्रो. पी.वी.बी. सुब्रह्मण्यममहोदयः आसीत्। एतस्मिन् कार्यक्रमे सर्वे अपि परिसरीयाः छात्राः विविध-विभागीयाः प्राध्यापकाश्च समुपस्थिताः आसन्।

## हिमजाग्रतिमञ्चकार्यक्रमः

वेदव्यासपरिसरे सभागारे 13-07-2022 तमे दिनाङ्के परिसरच्छात्राणां कृते प्रातिभप्रोत्साहनपरामर्शनकार्यक्रमः आयोजितः। अस्य संयोजकः शिक्षाशास्त्रविभागस्य प्राध्यापकः डॉ. मनीष-जुगरानमहोदयः आसीत्। कार्यक्रमे अस्मिन् परिसरस्य प्रायेण शतोत्तरच्छात्रछात्राः भागं गृहीतवन्तः।

## सम्भाषणशिबिरम्

वेदव्यासपरिसरे सभागारे 01-08-2022 तः 15-08-2022 दिनाङ्कं यावत् प्राक्शास्त्रिच्छात्राणां कृते संस्कृत-सम्भाषण-शिबिरकार्यक्रमः आयोजितः। यस्मिन् शिबिरचालकत्वेन शिक्षाशास्त्र-विभागस्य द्वितीयवर्षच्छात्राः श्रीटेकचन्दः, दिवाकरशर्मा, कुशाग्रः, श्रीदेवांशकृष्णः, अक्षितावसिष्ठः, सरिताशर्मा, भूमादेवी च सन्ति। प्राध्यापकः डॉ. मनीषजुगरानमहोदयः आसीत्।





## पादपरोपणकार्यक्रमः

04-08-2022 दिनाङ्के केन्द्रीयसंस्कृतविश्वविद्यालयस्य वेदव्यासपरिसरे परिसरनिदेशकस्य उपस्थितौ उद्यानविभागाधिकारिण्या परागपुरस्थया सुश्री वन्दनादेवीमहोदयया प्राप्तानां 108 फलदायकानां पादपानाम् आरोपणकार्यक्रमः आयोजितः। अवसरेऽस्मिन् परिसरस्य समेऽपि आचार्याः छात्राश्च उपस्थिताः आसन्।





## संस्कृतसप्ताहः

वेदव्यासपरिसरद्वारा 08 अगस्त् 2022 तः 14 अगस्त् 2022 पर्यन्तम् संस्कृतसप्ताहमहोत्सवः आयोजितः। कार्यक्रमोऽयं प्रतिदिनं 2. 30 वादनतः भवति स्म। कार्यक्रमस्य समन्वयकः डॉ. मञ्जुनाथवर्यः संयोजकश्च डॉ. मनीषजुगरानवर्यः आसीत्। कार्यक्रमेऽस्मिन् श्लोकपाठ-संस्कृतलेखन-संस्कृतभाषण-संस्कृतगीत-स्फूर्त्तिस्पर्धाः परिसरच्छात्राणां कृते आयोजिताः आसन्।

## स्वच्छता-पखवाड़ा

26-08-2022 दिनाङ्के वेदव्यासपरिसरे स्वच्छता-पखवाड़ा-इत्यस्य आयोजनमभूत्। कार्यक्रमेऽस्मिन् परिसरस्य राष्ट्रियसेवायोजना परिसरस्वच्छतां कृतवती। अस्य संयोजनं डॉ. कृष्णानन्ददन्नानावर्यः अकरोत्। योजनायाः समेऽपि स्वयंसेवकाः सोत्साहम् अस्मिन् भागम् अगृह्णन्।





## शिक्षकपर्व

05-09-2022 तः 09-05-2022 यावत् वेदव्यासपरिसरे शिक्षकपर्वणः आयोजनमभूत्। अस्य सम्पूर्णस्यापि कार्यक्रमस्य अध्यक्षः परिसरनिदेशकः प्रो. मदनमोहनपाठकवर्यः आसीत्। संयोजकश्च व्याकरणविभागस्य विभागाध्यक्षः डॉ. श्रीनाथधर-द्विवेदीवर्यः आसीत्। पञ्चदिनव्यापिने उत्सवेऽस्मिन् परिसरस्य नैके प्राध्यापकाः सम्मानिताः परिसरनिदेशकेन।

## हिन्दी-पखवाड़ा

14.09.2022 तः 21.09.2022 यावत् वेदव्यासपरिसरे हिन्दी-पखवाड़ा-इति कार्यक्रमः सम्पन्नोऽभूत्। परिसरनिदेशकस्य प्रो. मदनमोहनपाठकस्य मार्गदर्शने डॉ. ओमप्रकाशसहानीवर्यस्य संयोजकत्वे कार्यक्रमोऽयं सफलोऽभूत्। अस्य सह-संयोजकः डॉ. पीयूषकान्तत्रिपाठीवर्यः आसीत्। कार्यक्रमेऽस्मिन् छात्राणां कृते विविधाः स्पर्धाः आयोजिताः अभूवन्। तत्र छात्रैः विविधाः पुरस्काराश्च प्राप्ताः।



## रजतजयन्त्युत्सवः

वर्षेऽस्मिन् वेदव्यासपरिसरः 25 वर्षीयः अभवत्। अवसरेऽस्मिन् परिसरेण 15-09-2022 तः 17-09-2022 यावत् रजतजयन्त्युत्सवः आचरितः। कालेऽस्मिन् विश्वविद्यालयस्य कुलपतिः प्रो. श्रीनिवासवरखेड़ीवर्यः पूर्णरूपेण वेदव्यासपरिसरे अतिष्ठत् मार्गदर्शनं चाकरोत्। कार्यक्रमोऽयं परिसरनिदेशकस्य कुशलनेतृत्वे सफलतायाः सोपाने अग्रेसरोऽभूत्। कार्यक्रमेऽस्मिन् प्रो. प्रफुल्लकुमारमिश्रः, प्रो. सुरेन्द्रझाः, प्रो. के.बी. सुब्बारायुडुः, प्रो. लक्ष्मीनिवासपाण्डेयः, प्रो. रामकुमारशर्मा, प्रो. सच्चिदानन्दतिवारी, प्रो. सनन्दनकुमारत्रिपाठी, डॉ. रत्नमोहनझाः इत्यादयः सम्मानिताः अतिथयः समुपस्थिताः आसन्।

अस्य उत्सवस्य संयोजकः वेदान्तविभागस्य विभागाध्यक्षः डॉ. मञ्जुनाथवर्यः आसीत्। अवसरेऽस्मिन् परिसरस्य विकासयात्रायाः स्मारिकापि विमोचिता। एवमेव उत्सवेऽस्मिन् विविधानि सत्राणि सांस्कृतिककार्यक्रमाश्च आयोजिताः अभूवन्। पूर्वच्छात्राणां सम्मानपूर्वकम् अस्य उत्सवस्य सम्पूर्त्तिरभूत्।








## एन्.एस्.एस्. स्थापनादिवसः

24-09-2022 दिनाङ्के वेदव्यासपरिसरस्य राष्ट्रियसेवायोजनया स्थापनादिवसः आचरितः। कार्यक्रमोऽयं परिसरनिदेशकस्य प्रो. मदनमोहनपाठकस्य आध्यक्ष्ये सुसम्पन्नोऽभूत्। अस्य संयोजकः शिक्षाशास्त्रविभागस्य सहायकाचार्यः डॉ. कृष्णानन्दः आसीत्। अवसरेऽस्मिन् एन् एस् एस् इत्यस्य समेऽपि स्वयंसेवकाः उपस्थिताः आसन्।



# एकलव्यपरिसरवार्ता

## विथिनाटकम्

केन्द्रीयसंस्कृतविश्वविद्यालयस्य एकलव्यपरिसरस्य शिक्षाशास्त्र-विभागेण 21.04.2022 दिनाङ्के विथिनाटकम् आयोजितम्। अस्य विथिनाटकस्य मुख्याकर्षकः तावत् परिसरस्य शिक्षाशास्त्रविभागस्य शिक्षाशास्त्रिप्रथमवर्षस्य छात्राः 5 समुहेषु विभज्य लघु लघु नाटिका प्रस्तुता। तानि नाटकानि संस्कृतेन एव आसन्। तत्र मुख्यत्वेन बालिकाशिक्षाः, कन्याभ्रूणहत्यानिवारणोपायाः, स्वच्छताभियानम् इत्यादयः अभिनीताः।



## समायोजितः दशदिवसीयः संस्कृतशिक्षकप्रशिक्षणकार्यक्रमः

केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतिभिः श्रीनिवासवरखेडीवर्यैः त्रिपुराराज्यस्य अगरतलानगरस्थितैकलव्यपरिसरः प्राध्यापकविकासकेन्द्रत्वेन समुद्घोषितः। अस्य केन्द्रस्य पक्षतः अगस्तमासस्य 18 दिनाङ्कादारभ्य 29 दिनाङ्कं यावत् प्रथमः दशदिवसीयः संस्कृतशिक्षकप्रशिक्षणकार्यक्रमः सञ्चालितः। ऐषमः कार्यक्रमः केन्द्रीयसंस्कृतविश्वविद्यालयस्य एकलव्यपरिसरः, अगरतला तथा च संस्कृतभारती, त्रिपुरा इत्यनयोः संयुक्ततत्त्वावधाने संस्कृतशिक्षकाणां निर्माणमुद्दिश्य समायोजित आसीत्।



## प्राध्यापकविकासकेन्द्रस्य समुद्घाटनसमारोहः

केन्द्रीयसंस्कृतविश्वविद्यालयस्य त्रिपुराराज्यस्य अगरतलास्थितः एकलव्यपरिसरः प्राध्यापकविकासकेन्द्रत्वेन समुद्घोषितः। अगस्तमास्यस्य 18तमे दिनाङ्के (18.08.2022) अस्य प्राध्यापकविकासकेन्द्रस्य समुद्घाटनं समभवत्। उद्घाटनमिदं केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतिवरस्य प्रो. श्रीनिवासवरखेडीवर्यस्य समुपस्थितौ त्रिपुरा-विश्वविद्यालयस्य कुलपतिः माननीयः प्रो. गङ्गाप्रसादप्रसाईमहोदयः इत्यस्य करकमलाभ्यामभवत्।

## संस्कृतसप्ताहमहोत्सवः

केन्द्रीयसंस्कृतविश्वविद्यालयस्य त्रिपुराराज्यस्थेन एकलव्यपरिसरेण 08.08.2022 दिनाङ्कतः 14.08.2022 दिनाङ्कं यावत् संस्कृतसप्ताहमहोत्सवः आयोजितः। अस्य कार्यक्रमस्य उद्घाटनसमारोहे मुख्यातिथिपदं विभूषितवन्तः अगतलास्थकृषिमहाविद्यालयस्य प्राचार्याः तपनकुमारमाइतिमहोदयाः। कार्यक्रमस्याध्यक्षतां कृतवन्तः परिसरस्य निदेशकाः प्रो.सुकान्तकुमारसेनापतिवर्याः। विशिष्टातिथिपदम् अलंकृतवन्तः बौद्धदर्शनविभागस्य अध्यक्षाः प्रो.अवधेशकुमारचौबेमहोदयाः।



## हिन्दी-पखवाडा

01.09.2022 दिनाङ्के 'हिंदी-पखवाड़ा' कार्यक्रमस्य उद्घाटनसमारोहः अभवत्। कार्यक्रमे मुख्यातिथिरुपेण त्रिपुराविश्वविद्यालयस्य राजभाषाविभागस्य सहायकनिदेशकाः डॉ. मुनीन्द्रमिश्रवर्याः आसन्। अध्यक्षीयोद्बोधने प्रो. सुकान्तकुमारसेनापतिवर्यैः हिन्दीभाषायाः महत्त्वम् उपस्थापितम्। 06.09.2022 दिनाङ्के आनलाइन-माध्यमेन एकस्याः व्याख्यानमालायाः आयोजनं कृतं यस्यां हिन्दीविभागस्य पूर्वोत्तरपर्वतीयस्य शिलांगविश्वविद्यालयस्य विद्वांसः प्रो. दिनेशकुमारचौवेवर्याः 'पूर्वोत्तर भारत में राजभाषा की स्थिति एवं चुनौतियां' इत्यमुं विषयमधिकृत्य व्याख्यानं प्रास्तुवन्। छात्राणां कृते विविधस्पर्धाः समायोजिताः।








# भोपालपरिसरवार्ता

## हिन्दी-पखवाडा

'हिंदी-पखवाड़ा' कार्यक्रमः केन्द्रीयसंस्कृतविश्वविद्यालयस्य भोपालपरिसरे आचार्याणां रमाकान्तपाण्डेयवर्याणां मार्गदर्शने सम्पन्नः। एतद् उपलक्ष्य आयोजिते कार्यक्रमे सुप्रसिद्ध आलोचकः लेखकश्च प्रो. विजयबहादुरसिंहमहोदयः मुख्यातिथिरूपेण उपस्थितः आसीत्। कार्यक्रममुपलक्ष्य नैकाः स्पर्धाः समायोजिताः।








## नाट्यप्रशिक्षणकार्यशाला

भोपालपरिसरे दिनाङ्क 30.09.2022 तः नाट्यशास्त्रप्रयोगाधारिता दशदिवसीया कार्यशाला आयोजिता। अस्याः कार्यशालायाः उद्घाटनकार्यक्रमे केन्द्रीयसंस्कृत-विश्वविद्यालयस्य भूतपूर्वकुलपतयः आचार्याः राधावल्लभत्रिपाठिवर्याः मुख्यातिथि-रूपेण उपस्थिता आसन्। अस्य कार्यक्रमस्य अध्यक्षाः परिसरस्य निदेशकाः आचार्य रमाकान्तपाण्डेयवर्याः आसन्। अस्यां कार्यशालायां प्रशिक्षकरूपेण प्रसिद्धनाट्यवित्त एम्.के. सुरेश बाबु वर्यः उपस्थितः आसीत्।



# केन्द्रीयसंस्कृतविश्वविद्यालयः

( संसदः अधिनियमेन स्थापितः )

दिल्ली

केन्द्रीयसंस्कृतविश्वविद्यालयः संस्कृतभाषायाः प्रचाराय प्रसाराय च, अनुसन्धानस्य प्रोन्नतये ज्ञानस्य विभिन्नशाखानां विस्ताराय, शैक्षिककार्यक्रमेषु अन्तर्विषयाकध्ययनावसरप्रदानाय, अनुसन्धाने नवाचारस्य प्रोन्नतये संरचनाय च, संस्कृतस्य तद्गतशास्त्रीयविषयाणां समग्रविकासाय संवर्धनाय, अनुसन्धानार्थं भाविसन्तानस्य प्रशिक्षणाय च कार्यं विदधाति।

## विशेषाः

- विश्वविद्यालयस्य मुख्यालयेन सह देशस्य विभिन्नेषु स्थानेषु (जम्मू, जयपुरम्, हिमाचलप्रदेशः, देवप्रयागः, लखनऊ, प्रयागराजः, भोपालम्, पुरी, मुम्बई, अगरतला, शृङ्गेरी, गुरुवायूर) द्वादश परिसराः विलसन्ति।
- विश्वविद्यालयः द्वाविंशतिम् आदर्शमहाविद्यालयान्, चतसृः शोधसंस्थाः, संबद्धसंस्थाः च संचालयति।
- संस्कृतेनैव अध्ययनम् अध्यापनं च।
- राष्ट्रियशिक्षानीतिः-2020 इत्यस्यनुगुणं पाठ्यक्रमस्य संचालनं भवति।
- नवाचारयुक्तानुसन्धानाय अधिकः अवसरः।
- विभिन्नान्तर्विषयकाध्ययने अधिकावसरः।
- विभिन्नशास्त्रेषु निष्णाताः विद्वांसः अध्यापकाः शास्त्राणि अध्यापयन्ति।
- अष्टसहस्राधिकाः विद्यार्थिनः प्राक्शास्त्रि-शास्त्रि-आचार्य-विद्यावारिधिस्तरेषु संस्कृतमाध्यमेन विद्यार्जनं कुर्वन्ति।

## प्रमुखकार्याणि

- विभिन्नराज्येषु परिसराणां स्थापना।
- माध्यमिक-पूर्वस्नातक-स्नातक-स्नातकोत्तर-विद्यावारिधिस्तरेषु पारम्परिकपद्धत्या संस्कृतशिक्षणम्।
- स्नातक-(शिक्षाशास्त्रम्/बि.एड्.) स्नातकोत्तर-(शिक्षाचार्य/एम्.एड.) स्तरयोः संस्कृतशिक्षणप्रशिक्षणम्।
- संस्कृतस्य विभिन्नविषयेषु शोधकार्यार्थं प्रोत्साहनम्।
- संस्कृतस्य प्रचाराय शिक्षामन्त्रालयस्य योजनानां कार्यान्वयनम्।
- संस्कृतपुस्तकालयानां पाण्डुलिपिसंग्रहालयानां स्थापना तथा दुर्लभपाण्डुलिपीनां महत्त्वपूर्णयोग्यपुस्तकानां प्रकाशनम्।
- संयुक्तपरियोजनायाः संचालने अन्यसंस्थाभ्यः सहायः।
- मुक्तस्वाध्यायपीठमाध्यमेन दूरस्थकार्यक्रमाणां संचालनम्।
- संस्कृत-पालि-प्राकृत-प्रोन्नयनाय भारतसर्वकारस्य शिक्षामन्त्रालयस्य योजनानां कार्यान्वयनम्।

विभिन्नसंस्कृतेषु आचाराणां नीडम् एकं भारतं श्रेष्ठं भारतम् इत्यस्य मानकः केन्द्रीयसंस्कृतविश्वविद्यालयः

Sanskritavarta : Quarterly News Bulletin of Central Sanskrit University Vol.I-II Issue No.1 Pub. by the Registrar for Central Sanskrit University, 56-57, Institutional Area, Janakpuri, New Delhi-110058 & Printed at D.V. Printers, 97-U.B. Jawahar Nagar, Delhi-110007